# Sutakrita 2 Shiva Stuti

# सूतकृता २ शिवस्तुतिः

## Document Information

Text title : Sutakrita 2 Shiva Stuti

File name : sUtakRRitA2shivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | 40 sUtamunisaMvAdaH | vAvRittashlokAH ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

Sutakrita 2 Shiva Stuti

# सूतकृता २ शिवस्तुतिः

(शिवरहस्यान्तर्गते ईशाख्ये)

हे विश्वनाथ ममनाथ सनाथ पाहि
हे मन्मथान्तक विभो परिपाहि शम्भो ।
आनन्दकाननिवास पिनाकपाणे
वाणीशवन्द्यमहिमन् भगवन्नमस्ते ॥ ३॥

हे सङ्गमेश रमणेश्वर शेषभूष
पाहीश मामकधिया परिपाहि दीनान् ॥ ४॥

क्षयद्वीर काकोदरानद्धहार-
स्फुरत्स्फार कर्पूरगौर प्रसीद ।
विभो धीर विश्वेश भूतेश शम्भो
महाघोरवैश्वानराक्ष प्रसीद ॥ ५॥

श्रीसङ्गमेश तव लिङ्गसमर्चनेन
साङ्गाभिषङ्गतनवोऽप्यखिलाघभङ्गाः ।
गङ्गाम्भसाऽऽप्लुतशरीरसमस्तसङ्गा
नाङ्गा भवेमहि पुनस्तव पादसङ्गाः ॥ ६॥

श्रीमत्त्रिलोचन सनातन देहहीन
पञ्चाननावन हुताशरवीन्दुनेत्र ।
नेत्राग्निदग्धमदनाङ्ग हर प्रसीद
सिद्धाभिनन्द्यमहिमन् भगवन्नमोऽस्तु ॥ ७॥

विप्रानथ प्राप्तसुखान् कुरुष्व ।
क्षिप्रं त्वमद्यैव दयावतादृशा ॥ ८॥

केदारेश्वर हारभास्वरमहाकाकोदराकल्पका-
नल्पाकल्प भवत्यथोजजमहामुञ्जादिषडाङ्गकम् ।

नेत्राहस्कर तस्करान्तक हर स्वामिन् प्रसीदाशु नः ॥ ९॥

शम्भो विभो पशुपतीश्वर कालकाल
हे व्यालमाल गरलाशन हस्तशूल ।
दक्षैकपक्षे सुपक्षमहोक्षवाह (? )
त्र्यक्षाधुना रक्ष कटाक्षकोऽद्य (? ) ॥ १०॥

संसाराम्बुधितारकान्तकहरस्वामिन् मृडानीपते
मारापारशरादिभिन्नहृदयान् संवीक्ष्य विद्याहरः ।
स त्वं तारकनामकेश्वर विभो पाहि प्रपन्नान् मुनीन्
अस्मानुद्धर धीरवीर भगवन् संहारयाघं हि नः ॥ ११॥

हेमध्यमेश करुणाकर शूलपाणे
पाहीश फाणित सुमेध्यवचोऽन्तरङ्ग ।
अध्येम विद्येव तवोरुनाम
यन्मुक्ति सिध्यै तव सुप्रसादतः ॥ १२॥

कदा न मुक्तं त्वविमुक्तमेतत्
भुक्तेषु मुक्तिप्रदनाथ त्वया ।
देवाविमुक्तेश्वरमुक्तिभाग्यं
वैराग्यमप्यत्र ददस्व नः सदा ॥ १३॥

हे स्वर्णवर्णभगवन् परिपूर्ण शम्भो
चक्षुः श्रवोत्कीर्णसुकर्ण शम्भो ।
हे अन्नपूर्णापतये नमस्ते
तत्रेत्थमेव नियतं प्रवदन्ति शैवाः ॥ १४॥

हे वीरेश महेश शङ्कर विभो पाहीश विश्वाधिक ।
शश्वन्नश्वर विश्वपालक विभो पाहि प्रसीदाधुना ॥ १५॥

हे वृद्धकाल करुणावरुणालयाद्य
पाहि प्रसीद परमेश्वर कालकाल ।
हे कृत्तिवास जनवास महेश्वराद्य
हे श्रीनिवासनयनार्चितपादपद्म ॥ १६॥

हे सङ्गमेश दुरितौघविभङ्गकेश ।
श्रीतारकेश शशिमौलि कलाललाम ॥ १७॥

हे सिद्धेश महेश पाहि दयया विद्धीश दीनं हिमाम् ॥ १८॥

श्रीमत्त्रिलोचन जनावन पाहि शम्भो
कुम्भोद्भवादिमुनिवन्द्यपदाब्जयुग्म ।
हे मध्यमेश परिपाहि सुमेध्य शम्भो
केदारनायक विभो परिपाहि शम्भो ॥ १९॥

पुण्याविमुक्तेश्वर भक्तिमुक्तिं
शक्तिं प्रदेहि तव लिङ्गसमर्चनाय ।
पाहीति ये प्रणतिपूर्वकमादरेण
तत्राविमुक्तसदने प्रवदन्ति शैवाः ॥ २०॥

ज्ञानेश विज्ञानद कालकाल
यज्ञेश पाहि दयया परिपाहि शम्भो ॥ २१॥

ओङ्कारेश महेश शाश्वत विभो पाहि प्रसीदाधुना
हे शम्भो मणिकर्णिकेश भगवन् रामेश लक्ष्मीश्वर ।
दक्षेशान दयानिधान भगवन् श्रीभारभूतेश्वर
व्यासेशान गराशनेश महते चन्द्रेश पाह्यद्य माम् ॥ २२॥

ब्रह्मेशान जगद्विधानमहिमन् पाहि प्रसीदाधुना ॥ २३॥

॥ इति शिवरहस्यान्तर्गते सूतकृता शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । ईशाख्यः द्वादशमांशः । ४० सूतमुनिसंवादः । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . 40 sUtamunisaMvAdaH . vAvRRittashlokAH ..

Notes:

Sūta सूत eulogizes Śiva शिव towards the conclusion of The ŚivaRahasyaṁ . Dvādaśāṁśaḥ शिवरहस्यम् । द्वादशांशः.

Proofread by Ruma Dewan

*Sutakrita 2 Shiva Stuti*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*